# भूषणसारे प्रश्नः

उदयशंकर खाटुया

**प्रश्नः - कथं प्राचीनवैयाकरणोक्तलक्षणस्य प्रायिकत्वमुक्तम् इति कारिकोल्लेखपुरःसरं विस्तरशः विविच्यताम् ।**

उत्तरम् –

प्राचीनवैयाकरणनये समासः चतुर्धा अव्ययीभावः, तत्पुरुषः, द्वन्द्वः बहुव्रीहिश्चेति। तेषां नये पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्परुषः, उभयपदार्थप्रधानो द्वन्द्वः, अन्यपदार्थप्रधानो बहुव्रीहिः। परन्तु एतानि लक्षणानि न निर्दुष्टानि । वस्तुतः अव्याप्त्यतिव्याप्त्यसम्भवदोषत्रयरहितो धर्मो हि लक्षणम् ।एतेषु एकस्य सद्भावे लक्षणं दुष्टं भवेत्।प्राचीनवैयाकरणोक्तानि पूर्वपदार्थप्रधानादि लक्षणानि अव्याप्त्यादिदोषदुष्टत्वात् प्रायिकम् । तदुक्तम् –

समासस्तु चतुर्धेति प्रयोवादस्तथा परः।
योऽयं पूर्वपदार्थादिप्राधान्यविषयः स च।।
भूतपौर्व्यात्सोऽपि रेखागवयादिवदास्थितः।। इति।

तथाहि **उन्मत्तगङ्गम्** इत्याद्यव्ययीभावे पूर्वपदार्थप्राधान्याभावादव्याप्तिः। प्राचीनोक्तलक्षणानुसारं अव्ययीभावसमासे पूर्वपदार्थस्य प्राधान्यं स्यात्, परन्तु उन्मत्तगङ्गमिति अव्ययीभावसमासवदपि पूर्वपदार्थप्राधान्यहीनम् । अत्र तु अन्यपदार्थस्य प्राधान्यमवगम्यते। अतः अबहुव्रीहौ बहुव्रीहिगमनरूपातिव्याप्तिः(अलक्ष्ये लक्षणगमनम्

अतिव्याप्तिः), किञ्च, लक्ष्ये अव्यायीभावसमासे लक्षणगमनाभावात् अव्ययीभावलक्षणाव्याप्तिः।

एवं सूपप्रति इति अव्ययीभावोऽपि पूर्वपदार्थप्राधान्याभावदर्शनात् उत्तरपदार्थप्राधान्यदर्शनात् च अव्ययीभावाव्याप्तिः तत्पुरुषातिव्याप्तिश्च।

अर्धपिप्पली इति तु तत्पुरुषसमासवत् पदम्। अतः प्राचीनलक्षणानुसारम् उत्तरपदार्थप्रधानेनैव भाव्यम् । परन्तु प्रोक्ते उदाहरणे पूर्वपदार्थस्य प्राधान्यमवगम्यते । पूर्वपदार्थप्रधानस्तु अव्ययीभावस्यैव भवति। अतः एतत् अव्ययीभाव्यस्य अलक्ष्यम्। तथाप्यत्र अव्ययीभावलक्षणगनात् अतिव्याप्तिः। किञ्च, तत्पुरुषस्य लक्ष्यमपि अत्र प्राचीनोक्ततत्पुरुषलक्षणं न संगच्छते अतः तत्पुरुषाव्याप्तिः।

द्वित्रा इति बहुव्रीहिसमासवत् । बहुव्रीहौ तु प्राचीनोक्तलक्षणानुसारम् अन्यपदार्थस्य प्राधान्यं भवति। द्वित्रा इति बहुव्रीहिसमासबद्धमपि अन्यपदार्थप्राधान्यं नावगम्यते। अत्र तु उभयपदार्थप्राधान्यमवगम्यते। अतः द्वन्द्वातिव्याप्तिः बहुव्रीहिलक्षणाव्याप्तिश्च।

एवं शशकुशपलाशम् इत्यत्र द्वन्द्वे अन्यपदार्थप्राधान्यात् बहुव्रीह्यतिव्याप्तिः द्वन्द्वाव्याप्तिश्च स्यात् । अतः चतुर्षु एव समासलक्षणेषु दोषसत्त्वात् तेषां प्रायिकत्वमुक्तं दीक्षितेन।

तर्हि अव्ययीभावादीनां लक्षणं कथं स्यादिति चेद् वक्तव्यम् अव्ययीभावाधिकारपठितत्वमव्ययीभावत्वम् । तत्पुरुषाधिकारपठितत्वं तत्पुरुषत्वम् ।वस्तुतः जहत्स्वार्थावृत्तिपक्षे शक्तपदघटकवर्णानामिव वृत्तिघटकपदानाम् आनर्थक्यात् पूर्वोत्तरपदयोः अर्थवत्त्वाभावेन उत्तरपदार्थनिष्ठप्रकारतानिरूपितपूर्वपदार्थनिष्ठविशेष्यताकबोधजनकत्वस्य उपकुम्भमित्याद्यव्ययीभावे वक्तुमशक्यत्वात् ।

वस्तुतः प्राचीनोक्तलक्षणानि चित्रगवयवद् । यथा चित्रलिखिते गवि गोवद्व्यवहारो भवति तथैव एतानि लक्षणानि न वास्तविकानि । परन्तु बोधकता तु स्यादेव।